# .. shrIbadarInAthAShTakam ..

## ॥ श्रीबदरीनाथाष्टकम् ॥

भू-वैकुण्ठ-कृतं वासं देवदेवं जगत्पतिम् ।
चतुर्वर्ग-प्रदातारं श्रीबदरीशं नमाम्यहम् ॥ १॥
तापत्रय-हरं साक्षात् शान्ति-पुष्टि-बल-प्रदम् ।
परमानन्द-दातारं श्रीबदरीशं नमाम्यहम् ॥ २॥
सद्यः पापक्षयकरं सद्यः कैवल्य-दायकम् ।
लोकत्रय-विधातारं श्रीबदरीशं नमाम्यहम् ॥ ३॥
भक्त-वाञ्छा-कल्पतरुं करुणारस-विग्रहम् ।
भवाब्धि-पार-कर्तारं श्रीबदरीशं नमाम्यहम् ॥ ४॥
सर्वदेव-स्तुतं सश्वत् सर्व-तीर्थास्पदं विभुम् ।
लीलयोपात्त-वपुषं श्रीबदरीशं नमाम्यहम् ॥ ५॥
अनादिनिधनं कालकालं भीमयमच्युतम् ।
सर्वाश्चर्यमयं देवं श्रीबदरीशं नमाम्यहम् ॥ ६॥
गन्दमादन-कूटस्थं नर-नारायणात्मकम् ।
बदरीखण्ड-मध्यस्थं श्रीबदरीशं नमाम्यहम् ॥ ७॥
शत्रूदासीन-मित्राणां सर्वज्ञं समदर्शिनम् ।
ब्रह्मानन्द-चिदाभासं श्रीबदरीशं नमाम्यहम् ॥ ८॥
श्रीबद्रीशाष्टकमिदं यः पटेत् प्रयतः शुचिः ।
सर्व-पाप-विनिर्मुक्तः स शान्तिं लभते पराम् ॥ ९॥
॥ ॐ तत्सत् ॥

Encoded and proofread by
N. Balasubramanian bbalu at sify.com

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org